


श्रीमत् वेदान्त रामानुज मुनि करुणालब्ध वेदान्त युग्मम्
श्रीमत् श्रीवास योगीश्वर गुरुपदयोर्पित स्वात्मभारम्
श्रीमत् श्रीरङ्गनाताह्वय मुनिकृपया प्राप्त मोक्षाश्रमं तं
श्रीमत् वेदान्त रामनुज मुनिमपरम् संश्रये देशिकेन्द्रम्



श्रीमत् श्रीवास योगीश्वर मुनि करुणालब्ध वेदान्त युग्मम्
श्रीमत् वेदान्त रामानुज गुरुपदयोर्पित स्वात्मभारम्
श्रीमत् श्रुत्यन्त रामानुज यति नृपतेः प्राप्त मोक्षाश्रमं तं
श्रीमत् श्रीवास रामनुजमुनिं संश्रये ज्ञानवार्धिम्



वेदान्त लक्ष्मण मुनीन्द्र कृपात्त बोधम्
तत्पाद युग्म सरसीरुह भृङ्गराजम्
त्रय्यन्त युग्म कृतभूरि परिश्रमं तं
श्रीरङ्ग लक्ष्मणमुनिम् शरणं प्रपद्ये

# श्री पञ्चायुध स्तोत्रम्

***shrI pa~nchAyudha stotram***

# श्री पञ्चायुध स्तोत्रम्

स्फुरत्-सहस्त्रारशिखाति तीव्रम् सुदर्शनं भास्कर कोटि तुल्यम्।

सुरद्विषां प्राणविनाशि विष्णोः चक्रं सदाऽहम् शरणं प्रपद्ये॥ [1]

विष्णोर्-मुखोत्थानिलपूरितस्य यस्य ध्वनिर्-दानव दर्पहन्ता।

तं पाञ्चजन्यं शशि कोटि शुभ्रम् शङ्खं सदाऽहम् शरणं प्रपद्ये॥ [2]

हिरण्मयीं मेरु समान सारां कौमोदकीं दैत्यकुलैकहन्त्रीं।

वैकुण्ठ-वामाग्रकराभिमृष्टां गदां सदाऽहम् शरणं प्रपद्ये॥ [3]

रक्षोऽसुराणां कठिनोग्र कण्ठच्छेदक्षरच्-छोणितदिग्धधारम्।

तं नन्दकं नाम हरेः प्रदीप्तं खड्गं सदाऽहम् शरणं प्रपद्ये॥ [4]

यज्ज्यानि नाद श्रवणात् सुराणां चेतांसि निर्मुक्त भयानि सद्यः।

भवन्तिदैत्याशनिबाणवर्षी शार्ङ्गं सदाऽहम् शरणं प्रपद्ये॥ [5]

इमं हरेः पञ्च महा युधानां स्तवं पठेद्योऽनुदिनं प्रभाते।

समस्त दुःखानि भयानि सद्यः पापानि नश्यन्ति सुखानि सन्ति॥ [6]

वने रणे शत्रु जलाग्नि मध्ये यद्दच्छयापत्सु महाभयेषु।

इदं पठन् स्तोत्रमनाकुलात्मा सुखी भवेत् तत् कृत सर्व रक्षः॥ [7]